CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



RGCSLIB
25916
CENTRAL LIBRARY
CSU,RGCS

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# CENTRAL SANSKRIT UNIVERSITY

## RAJIV GANDHI CAMPUS, SRINGERI- 577139

## LIBRARY

Class No. _____

Book No. _____

Accession No. 25916

25916

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ श्रीः ॥

# ॥ पञ्चसूक्तानि ॥

(पुरुषसूक्त, नारायणसूक्त, श्रीसूक्त, भूसूक्त, नीळासूक्तानि)

चेन्नपुर्याम्

वाविळ्ळ. रामस्वामिशास्त्रुलु अण्ड् सन्स्

इत्येतैः प्रकटितानि

*All Rights Reserved.*

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# ॥ विक्रमार्कचरित्रम् ॥

भो महाशयाः, अस्मन्मुद्रणशालायामिदानीं देवनागरलिप्यामपि ग्रन्थाः मुद्र्यन्ते इति विदितचरमेव तत्रभवतां भवताम् ॥

सुप्रसिद्धेषु गद्यग्रन्थेषु संस्कृतभाषाप्रविविक्षूणां विक्रमार्कचरित्रम्, भोजचरित्रमित्युभावेव सुगमौ ॥ दाक्षिणात्यपाठानुसारेण मुम्बापुर्यादिपत्तनेषु मुद्रितयोरनयोः पुस्तकयोरभावादिदानीं विक्रमार्कचरित्रं दाक्षिणात्यपाठानुसारेणान्ध्रलिप्यां ग्रन्थलिप्यां च मुद्रितकोशैः समीकृत्य स्थूलैरायसाक्षरैः दृढचिक्कणपत्रेषु संमुद्र्य विक्रेयमस्ति । आंग्लपाठशालायां पठितॄणां माणवकानामुपकाराय, आंग्लानुवादसहिता, अकाराद्यनुक्रमणिका (Glossary) संयोजितास्ति । पाठशालाध्यापकाः सर्वेऽपि माणवकानेतत्पुस्तकक्रयणाय प्रोत्साह्य, एतादृशग्रन्थमुद्रणाय प्रोत्साहयेयुरस्मानिति प्रार्थयामहे ॥

भोजचरित्रमपि त्वरितमेव प्रकटिष्यते ॥ इत्थं भवद्विधेयाः ।

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ श्रीः ॥

# ॥ पञ्चसूक्तानि ॥

(पुरुषसूक्त, नारायणसूक्त, श्रीसूक्त, भूसूक्त, नीळासूक्तानि)

चेन्नपुर्याम्

वाविळ्ळ. रामस्वामिशास्त्रुलु अण्ड् सन्स्

इत्येतैः प्रकटितानि

१९२७.

*All Rights Reserved.*

Central Sanskrit University 25916 CENTRAL LIBRARY Rajiv Gandhi Campus

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

PRINTED AT
THE 'VAVILLA' PRESS,
MADRAS.—1927.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

RGCSLIB
25916

मीः ॥

# ॥ पुरुषसूक्तम् ॥

[शान्तिमन्त्रः]

ओं ॥ तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शंनो अस्तु द्विपदे । शं चतुष्पदे । ओं शान्तिश्शान्तिश्शान्तिः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



सहस्रशीर्षापुरुषः । सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशांगुलम् । पुरुष एवेदँ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्यायाँश्च पूरुषः ॥ १ ॥ पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातोऽत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ २ ॥ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदा-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दाज्यम् । ग्रीष्म इध्मश्शरद्धविः । सप्तास्यासन्परिधयः । त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं-तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ॥ ३ ॥ तेन देवा अयजन्त । साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे छन्दाँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ४ ॥ तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ॥५॥
ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायत । चन्द्रमा मनसो-
जातः । चक्षोस्सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजा-
यत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां
भूमिर्दिशश्श्रोत्रात् । तथा लोकाꣳ अकल्पयन् ॥ ६ ॥ वेदाहमेतं
पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य
धीरः । नामानि कृत्वाऽभिवदन् यदास्ते । धाता पुरस्ताद्यमुदाजहार ।
शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः

CC-0. Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF.

पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सान्ति देवाः ॥ ७ ॥

पूरुषः पुरोऽग्रतोऽजायत कृतोऽकल्पयन्नासन्द्वे च ॥ १ ॥ (ज्यायानधिपूरुषः । अन्यत्र पुरुषः ॥)

अद्भ्यस्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति

CC-0. Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



गर्भे अन्तः । अजायमानो बहुधा विजायते ॥ १ ॥ तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे ॥ २ ॥ ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपं । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ ३ ॥

जायते बहवे सप्त च ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. Public Domain. Digitization by eGangotri. Funding MIDF

तच्छंयोरावृणीमहे । गातु यज्ञाय । गातु यज्ञपतये । दैवी स्वास्तिरस्तु नः । स्वस्तिर्मानुषभ्येः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे । ओं शान्तिश्शान्तिश्शान्तिः ॥ हरिः ओंम् तत्सत् ॥

इति पुरुषसूक्तम् ॥

———

CC-0. Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# नारायणसूक्तम्

ओं सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ओं शान्ति श्शान्ति-श्शान्तिः ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वं नारायणं देव-मक्षरं परमं प्रभुम् (प्रदम्) । विश्वतः परमान्नित्यं (मान्नित्यं) विश्व नारायणगँ हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्व-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्यात्मेश्वरगँ् शाश्वतगँ् शिवमच्युतम् । नारायण महाज्ञेय विश्वात्मानं परायणम् । नारायणपरं ब्रह्म तत्वं नारायणः परः । नारायणपरो ज्योतिरात्मा नारायणः परः । नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च किञ्चिज्जगत्सर्वम् (त्यस्मिन) दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्थितः ॥ १ ॥ अनन्तमव्ययं कविगँ् समुद्रेऽन्तं विश्वशंभुवम् । पद्मकोशप्रतीकाशगँ् हृदयं चाप्यधोमुखं । अधो निष्ट्या वितस्त्यां तु(ते)नाभ्यामुपरि तिष्ठति । ❀(हृदयं तद्विजानीया)द्विश्वस्यायतनं महत् । संततगँ् सिराभिस्तु लम्बत्या कोशसन्निभम् । तस्यान्ते सुषिरगँ् ~~क्ष्मस्यं~~-तस्मिन्थ्सर्वं

ज्वालमालाकुलं भाती सूक्ष्म-

CC-0. Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



प्रतिष्ठितम् । तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः । सोऽग्र-
भुग्विभजन्तिष्ठन्नाहारमजरः कविः । त्रिर्यगूर्ध्व मधश्शायी रश्मय-
स्तस्य सन्तता । संतापयति स्वं देहमापादतलमस्तकम् । तस्य
मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ॥ २ ॥ नीलतोयदमध्यस्था
विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा
(पीताभास्यात्तनूपमा)। तस्याशिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्मा स शिव (स्सहरि) स्सेन्द्रे स्सोऽक्षरः परमस्स्वराट् ॥ ३ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

नारायणः स्थितोऽव्यवस्थितश्चत्वारि वा ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ऋतगँ् सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गळम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥

ओं नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्

---

CSU-Sringeri Campus Rare Book and Manuscript Collection - Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# विष्णुसूक्तम्

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि
यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रधोरुगायो विष्णो-
रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णो-
र्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ तदस्य प्रियमभिपाथो अश्याम् ।
नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः
पदे परमे मध्व उथ्सः ॥ प्रतद्विष्णुस्तवते वीर्याय । मृगो न भीमः
कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुव

CC-0. Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF.
नानि विश्वा। परो मात्रया तनुवा वृधान। न ते महित्वमन्वश्नुवन्ति। उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वं परमस्य विथ्से॥ विचक्रमे पृथिवीमेष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। उरुक्षितिगँ सुजनिमाचकार॥ त्रिर्देवः पृथिवीमेषएताम्। विचक्रमे शतर्चसं महित्वा। प्रविष्णुरस्तु तवसस्तवीयान्। त्वेषगँ ह्यस्य स्थविरस्य नाम। अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्यास्सप्तधामाभिः॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पागँसुरे॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। ततो धर्माणि धारयन्। विष्णोः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यस्सखा ॥ तद्विष्णोः परमं पदगँ् सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते। विष्णोर्यत्परमं पदम् ॥ पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥

सहनाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ओं शान्तिः शान्तिः शान्तिः ॥

इति नारायणसूक्तविष्णुसूक्ते च ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# श्रीसूक्तम्

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मम आ (म आ) वह । तां म आवह जातवेदो लक्ष्मी-मनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् । अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां । कां सोऽस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम् । चन्द्रां

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमीं (पद्मिनीमीं) शरणमहं प्रपद्येऽ लक्ष्मीर्मे नश्यतां त्वां वृणे । आदित्य-वर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु (न्ति) मायान्तरायाश्च बाह्या अलक्ष्मीः । उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रदुभूतोऽस्मि राष्ट्रेऽस्मिन् कीर्ति-मृद्धिं ददातु मे । क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं (रीगँ) सर्वभूतानां त्वामिहोपह्वये

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रियम् । मनसः काममाकूतिं वाचस्सत्यमशीमहि । पशूनागँ् रूप-
मन्नस्य मयि श्रीश्श्रयतां यशः । कर्दमेन प्रजा भूता मयि संभव
कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् । आपस्सृजन्तु
स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरं श्रिय वासय
मे कुले । आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूया
हिरण्मयीं लक्ष्मीं जातवेदो ममावह । आर्द्रां यः करिणीं यष्टिं
पिङ्गळां पद्ममालिनीं । चन्द्रां हिरण्मयीं लक्ष्मी जातवेदो ममा
(म आ) वह । तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम ।

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । श्रियः पञ्च दशर्चं च श्रीकामस्सततं जपेत् ॥ आनन्दः कर्दमश्चैव चिक्लीत इति विश्रुताः । ऋषयस्ते त्रयः प्रोक्तास्स्वयं श्रीरेवदेवता । पद्मासने पद्मोरु पद्माक्षी पद्मसंभवे । त्वम्मां भजस्व पद्माक्षि येन सौख्यै-लभाम्यहं ॥ अश्वदायिं च गोदायि धनदायि महाधने । धनं मे जुषतां देवी सर्वकामार्थसिद्धये ॥ पुत्रपौत्रधनं धान्यं हस्त्यश्वाजाविगोरथम् । प्रजानां भवसि माता आयुष्मन्तं करोतु माम् । चन्द्राभां लक्ष्मीमीशानां सूर्याभां श्रियमीश्वरीम् । चन्द्रसूर्याग्निवर्णाभां श्री-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महालक्ष्मीमुपास्महे ॥ धनमग्निर्धनंवायुर्धनं सूर्यो धनं वसुः। धन-
मिन्द्रो बृहस्पतिर्वरुणो धनमश्नुते ॥ वैनतेय सोमं पिब सोमं पिबतु
वृत्रहा। सोमं धनस्य सोमिनो मह्यं ददातु सोमिनि ॥ न क्रोधो न
च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां-
श्रीसूक्तं जपेत्सदा ॥ वर्षन्तु ये विभावरि दिवो अभ्रस्य विद्युतः।
रोहंतु सर्वबीजान्यवब्रह्मद्विषो जहि ॥ पद्मप्रिये पद्मिनि पद्महस्ते
पद्मालये पद्मदळायताक्षि। विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं
मयि संनिधत्स्व ॥ यासा पद्मासनस्था विपुलकटितटी पद्मपत्राय
ताक्षी गंभीरावृत्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ॥ लक्ष्मी-

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



र्दिव्यैगजेन्द्रैर्मणिगणखचितैस्स्नापिता हैमकुंभैर्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गळ्ययुक्ता ॥ लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं । दासीभूतसमस्तदेववनितां लोकैकदीपांकुरां । श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधराम् । त्वां त्रैलोक्य-कुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥ शुद्धलक्ष्मीर्मोक्षलक्ष्मी-र्जयलक्ष्मीस्सरस्वती । श्रीर्लक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा । वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् । बालार्क कोटिप्रतिमां त्रिनेत्रां भजेऽहमम्बां जगदीश्वरीं ताम् ॥ सर्वमङ्गळ-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
माङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तु ते॥ श्रियै जातश्रिय आनिर्याय श्रियं वयो जनितृभ्यो ददातु। श्रियं वसाना अमृतत्वमायन्। भवन्ति सद्यस्सामिधामितद्यून् (सत्या सविता नृतद्यून्)॥ श्रिय एवैनं तच्छ्रियामादधाति। सन्तत-मृचा वषट्कृतं संधत्तं संधीयते प्रजया पशुभिः। य एवं वेद। ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्॥ हरिः ओं॥

इति श्रीसूक्तम्॥

---

CC-0. Jangamwadi Math Collection. Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# अथ भूसूक्तम्

हरिः ओं ॥ भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥ आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्थ्सुवः । त्रिँगृशद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह्द्युभिः । अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन्महिषस्सुवः । यत्त्वा । क्रुद्धः परो वप मन्युना यदवर्त्या । सुकल्पमग्नेतत्तव पुनस्त्वोद्दीपियामसि । यत्ते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मन्युपरोप्तस्य पृथिवीमनु दध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्॥

मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी। ब्रह्मवर्चसः पितृणाग्ँ श्रोत्रं चक्षुर्मनः। देवी हिरण्यगार्भिणी देवी प्रसूव(सोद)री। सदने सत्यायने सीद। समुद्रवती सावित्री हनो देवी मह्यङ्गी। महीधरणी महो ध्यतिष्ठत्। शृङ्गे शृङ्गेयज्ञे यज्ञे विभीषिणी। इन्द्रपत्नी व्यापिनी सुरसरिदिह (सरसिज इह)। वायुमती जलशयनी श्रियंधा (स्वयंधा) राजा सत्यन्तो परिमेदिनी। श्वो (सो) पारिधत्तं गाय। विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मीप्रियसखीं देवीं

CSU Sringeri Campus Rare Book and Manuscript Collection, Sri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



नमाम्यच्युतवल्लभाम् ॥ ओं धनुर्धराय विद्महेसर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात्। महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीची-मेनागूँ हविषा यजामः। त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। यच्छ्रोणैति श्रव इच्छमाना पुण्यगूँ श्लोकं यजमानाय कृण्वती ॥ हरिः ओम् ॥

इति भूसूक्तम् ॥

---

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# अथ नीळासूक्तम्

नीळां देवीगुँ शरणमहं प्रपद्ये सुतरासि तरसे नमः ॥ गृणाहि । घृतंवंती सवितराधिपत्त्यैः पयस्वती रन्तिराशानो अस्तु । ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता । बृहस्पतिर्मा तरिश्वोत वायुस्संधुवाना वाताअभि नो गृणन्तु । विष्टंभो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो नीळा प्रचोदयात् ॥

इति नीळासूक्तम ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri
Sri Siddhanta Sikhamani Jangamwadi Math Collection, Shimoga

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# ॥ क्रय्यपुस्तकानि ॥

| | | रू. | आ. |
|---|---|---|---|
| संस्कृतबालशिक्षा आन्ध्रलिप्यासमलंकृता, श्रीरामायण संग्रहसहिताच संस्कृतान्ध्राक्षर जिज्ञासूनामत्युपयोगिनी | | ० | ३ |
| सरस्वतीप्रार्थना, श्यामलादण्डकम्, नवरत्नमाला च | | ० | २ |
| शब्दमञ्जरी, (दृढपत्रात्मिका) | | ० | ३ |
| संस्कृतान्ध्रवर्णबोधिनी पत्रफलका | .... | ० | २ |
| यजुर्वेदसन्ध्यावन्दनम् | .... | ० | २ |
| महाकविबोधायनकृतभगवदज्जुकनाटकम् | .... | ० | ६ |
| रामकर्णामृतम | .... | ० | ८ |
| यजुर्वेदाह्निकम् | .... | ० | ६ |

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

| | | | |
|---|---|---|---|
| वेङ्कटेशसहस्रनामस्तोत्रम् नामावळीसहितम् | | ० | ४ |
| अन्नपूर्णासहस्रनामस्तोत्रम् | ,, | ० | ४ |
| आंजनेयसहस्रनामस्तोत्रम् | ,, | ० | ४ |
| गणपतिसहस्रनामस्तोत्रम् | ,, | ० | ४ |
| श्रीकृष्णसहस्रनामस्तोत्रम् | ,, | ० | ४ |
| श्रीलक्ष्मीनृसिंहसस्रनामस्तोत्रम् | ,, | ० | ४ |
| श्रीवटुकभैरवसहस्रनामस्तोत्रम् | ,, | ० | ४ |

वाविळ्ळ· रामस्वामिशास्त्रुलु अण्ड् सन्स्,
२९२, एस्प्लनेड्, चेन्नपुरी.

CC-0. Shringeri Campus Rare Book and Manuscript Collection, Shringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

| | | | | |
|---|---|---|---|---|
| भर्तृहरिशतकत्रयम्, मूलम् | | ... | ० | ८ |
| संस्कृतान्ध्रवर्णबोधिनी, पत्रफलका | | ... | ० | २ |
| श्रीलक्ष्मीनारायणहृदयम् | | ... | ० | ३ |
| ब्रह्मसूत्राणि, मूलमात्रम् | | ... | ० | ३ |
| श्रींदक्षिणामूर्तिस्तोत्रम् | | ... | ० | १ |
| विष्णुसहस्रनामस्तोत्रम्, नामावळीसहितम् | | .... | ० | ४ |
| ललितासहस्रनामस्तोत्रम् | ,, | ... | ० | ४ |
| लक्ष्मीसहस्रनामस्तोत्रम् | ,, | ... | ० | ४ |
| सुब्रह्मण्यसहस्रनामस्तोत्रम् | ,, | ... | ० | ४ |
| शिवसहस्रनामस्तोत्रम् | ,, | | ० | ४ |

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

| | | | |
|---|---|---|---|
| श्रीवैष्णवाह्निकम् | ... | ० | ८ |
| सूर्यनमस्कारमन्त्राः व्युचब्रह्मयज्ञसहितास्सुस्वराश्च | | ० | १ |
| लक्ष्मीनृसिंहस्तोत्रम् | ... | ० | १ |
| मुकुन्दमाला | ... | ० | १ |
| भगवद्गीता मूलमात्रम् | ... | ० | ४ |
| श्रीगोविन्दद्वादश (चतुर्दश) मञ्जरिकस्तोत्रम् | ... | ० | १ |
| विक्रमार्कचरित्रम् | ... | ० | १० |
| हिन्दी तेलुगु बालशिक्षा | ... | ० | ३ |
| ,, प्रथमवाच्चकम् | ... | ० | ८ |

CC-0. JSS Sanskrit Digital Archive, JSS Mahavidyapeetha, Mysuru. Digitized by JSS-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

| | | | |
|---|---|---|---|
| बालरामायणम् | .... | ० | २ |
| विवेकचूडामणिः | .... | ० | ८ |
| श्रीकृष्णकर्णामृतम् | .... | ० | ६ |
| ,, आंग्लानुवादसहितम् | .... | १ | ८ |
| शिवकवचम् | ... | ० | २ |
| शिवानन्दलहरी | .... | ० | २ |
| आदित्यहृदयम् | | ० | १ |
| पञ्चसूक्तानि | | ० | २ |
| रुद्रनमकचमकम् | | ० | ३ |
| सौन्दर्यलहरीस्तोत्रम् | | ० | २ |

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

# ॥ बृहत्स्तोत्ररत्नाकरः ॥

भोस्सहृदयाः, विज्ञापयामो वयं किमपि भवत्सु,

अधुनाकिल, अस्मन्मुद्रणालये देवनागरीलिपिभिस्सञ्जात मुद्रणानि सर्वमतपरिग्रहक्षमाणि सर्वदासुलभसङ्ग्रहणानि कवच, हृदय, पूजा, मन्त्राष्टोत्तर शतसहस्रनामादिसंवलितानि च कानि चन स्तोत्रजालान्यत्र सार्वजनीन पारायणादिसौकर्य सम्पिपादयिषया प्राकट्यमनैषिष्म ।

इत्थं भवद्विधेयाः

बाविळ्ळ. रामस्वामि शास्त्रुलु अण्ड् सन्स्,

ख्यापकाः.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri Funding MIDF

॥ अभिज्ञानशाकुन्तलं नाम नाटकम् ॥

भोभोस्सचेतसः, आधुनिकीकिल काचन विज्ञापना,

इदंकिल राघवभट्टकृतव्याख्यया, श्रीनिवासाचार्यरचित-व्याख्यया च सहितं दाक्षिणात्यौत्तरिकपाठभेदादिसङ्कलितं सहृदय-हृदयाह्लादनचातुरीधुरीणरसालङ्कारादिपरिष्कृतं च नाटकं स्फुटतर-देवनागरलिप्या मुद्राप्यमाणं सदचिरादेवास्मन्मुद्रणालये प्रचाराय भविष्यतीति ।

इत्थं भवद्विधेयाः

**वाविल्ल रामस्वामि शास्त्रुलु अण्ड् सन्स्,**

व्यापकाः

[పంచసూత్రకు ... 0-2-0.]

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

Central Sanskrit University
Rajiv Gandhi Campus
Sringeri
CENTRAL LIBRARY
Acc. No. 25916 Dated 30/01/2025
Call No.....

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri